# अभिज्ञानशाकुन्तले संस्कृतिविमर्शः

डॉ. अखिलेशकुमारद्विवेदी*

**सारांशः –**

साहित्ये समाजस्य दर्पणं विद्यते इति आचार्यमहावीरप्रसादद्विवेदिना कथितं साहित्यस्य वैशिष्ट्यकथनावसरे । द्विवेदिनःतत् वाक्यं नितान्तसत्यमेव अत एव व्यवहारविदः अनेनैव तात्कालिकं संस्कृतिमन्वेषयन्ति। भारतस्य विश्वप्रसिद्धं नाटकम् अभिज्ञानशाकुन्तलम् पठित्वा जनाः ज्ञानं विज्ञानमितिहासं सस्कृतिश्च अन्वेषयन्ति। वस्तुतः कविः उत्तमाचारपरम्परायाःसंरक्षणाय नवाचारप्रक्रियायाःवर्धनाय साहित्यप्रबध्नाति । अभिज्ञानशाकुन्तलाख्ये नाटके संस्क़तिविमर्शः अस्मिन लेखे क्रियमाणःवर्तते । नागरैः कथम् आश्रमेषु वर्ततितव्यम् ? आश्रमवासिभिःवा कथं व्यवहारः क्रियते ? समाजस्य किं कर्त्तव्य ग़ाष्ट्रम्प्रर्ति इत्यदिविषयगुम्फितो लेखोऽयम्।

**कूटशब्दाः** – परिपाकः, अजातपक्षाः, स्तोयाधारपथः,मृगया, परिभृतविरुतः, अष्टमूर्तयः , दिग्गजः, लोकपालः।

---

महाकविकालिदासविरचितम् अभिज्ञानशाकुन्तलं को न वेत्ति , यत्र महाकवेः कविकर्मणःपरिपाको दरिदृश्यते । वाक्यस्य द्वितीयः अंशः संस्कृतिविमर्शः अत्रेदं विचार्यते संस्कृतेः विमर्शः संस्कृतिर्नाम सम्यक् कृतिः संस्करणं वा समुपसर्गकस्य कृ धातोः भावे क्तिन्प्रत्यये सति संस्कृतिः सिद्ध्यति । व्यवहारे अस्यार्थोस्ति यत् जीवनपद्धतेः यया परिमार्जनं भवति सा संस्कृतिः। अङ्गलभाषया कल्चर इति पदेन व्यवह्रीयते लैटीन colera इति पदेन अस्य व्युत्पत्तिर्भवति यस्यार्थः कृषिकरणम् शनैः शनैः अस्यार्थस्य विस्तारो जायते यथा क्षेत्रे क्रियमाणस्य कार्यस्य कृषिरूपे विस्तारो भवति तथैव सभ्यतायाः विकासः संस्कृतिर्भवतीति सुस्थिरोर्थः। विमर्शो नाम विशिष्टो विचारः।

शाकुन्तलाख्ये काव्ये (नाटके) विभिन्नाः संस्कृतयो विलसन्ति। तथापि द्विधा विभज्यते – लोकसंस्कृतिः शास्त्रसंस्कृतिः। लोकसंस्कृतिः अविनाभावेन अस्माकं जीवने तादात्म्येन निवसति यथा जले शैत्यं तेजसि औष्ण्यं वा। शास्त्रसंस्कृति सर्वदा अनुशासनेन साधयति यथा सुवर्णस्य

परिष्कारं कृत्वा परिशोधनं क्रियते येन आभूषणयोग्यं स्यादिति । अतः व्यवहारजगति उभयोरपेक्षा। व्यवहारज्ञानाय सदाचाराय वा काव्यं प्रवर्तते महाकविरत्र विविधव्याजेन ध्वनयति अरण्यवासिनां जीवनं कीदृशं शान्तं तपःपूर्णं भवति यत्र मृगाः वन्यजीवाः निर्भयेण परिभ्रमन्ति -

**नीवाराः शुकगर्भकोटरमुखभ्रष्टास्तरुणामधः**
**प्रस्निग्धा क्वचिदिङ्गुदीफलभिदः सूच्यन्त एवोपलाः।**
**विश्वासोपगमादभिन्नगतयः शब्दं सहन्ते मृगा-**
**स्तोयाधारपथाश्च वल्कलशिखानिष्यन्दरेखाङ्किताः॥** [1]

अत्र वन्याः जातविश्वासाः रथादीनां शब्दान् सहन्ते, न भयं प्राप्नुवन्ति। कोटरेषु स्थिताः ये अर्भकाः नीडस्थाः अजातपक्षाः शावकाः तेभ्यःमुखेभ्यः भ्रष्टाः मुनिधान्यकणाः विद्यन्ते। इत्थं लोकसंस्कृतेरन्तर्गतं वन्यं जीवनं महाकविना दर्शितम्। राजापि तज्जीवनस्य मर्यादायाः रक्षणं कुरुते। **तपोवननिवासिनामुपरोधो मा भूत्। इहैव रथं स्थापय, यावदवतरामि। सूत! विनीतवेषेण प्रवेष्टव्यानि तपोवनानि नाम**[2] आश्रमव्यवस्थायाःस्वभावेन परिपालनं सर्वैःक्रियते ।पुरा राज्ञः मृगयाकरणं मनोरञ्जनं कर्म अभूत् तेन कः लाभः इत्यपि अवलोकनीयम् यद्यपि अधुना तन्न युक्तं तथापि तात्कालिकी संस्कृतिः –

**मेदश्छेदकृशोदरं लघु भवत्युत्थानयोग्यं वपुः**
**सत्वानामपि लक्ष्यते विकृतिमच्चित्तं भयक्रोधयोः॥**
**उत्कर्षः स च धन्विनां यदिषवः सिध्यन्ति लक्ष्ये चले**
**मिथ्यैव व्यसनं वदन्ति मृगयामीदृग्विनोदः कुतः॥**[3]

लोके मातुः व्रतं पुत्रसंरक्षणाय भवति यत्र परम्परैव प्रमाणं भवति – दुष्यन्तस्य माता चतुर्थ्याः व्रतस्य कृते स्मरति आदिशति च पुत्रमानेतुम् राजा आश्रमस्य महतः दायित्त्वस्य निर्वहणं करोति अतः पुत्रकल्पं मित्रं विदूषकं प्रेषयति- **देव्याज्ञापयति " आगामिनि चतुर्थदिवसे प्रवृत्तपारणो मम उपवासो भविष्यति। तत्र दीर्घायुषावश्यं सन्निहितेन भवितव्यम्" इति ।**[4] कस्यचित् शुभकर्मणि रोदनं न वरम् अतः शकुन्तलायाः प्रस्थानकाले कथयति – **सखि उचितं न ते मङ्गलकाले रोदितुम्**[5] **।** अधुनापि ग्रामे स्त्रियः पुत्र्याः प्रस्थानकाले लोकगीतानि गायन्ति तस्मिन् गीते परितः वस्तूनि वर्ण्यानि भवन्ति तथैव भावः प्रतिभाति यत् तस्मिन् समये कोकिलध्वनिमाकर्ण्य महर्षिः कण्वोऽनुमितवान् यत् बाल्य-कालादस्याः शकुन्तलायाः साहचर्येण भ्रातृभूतैरेभिः आश्रमवृक्षैर्मम प्रार्थनानुरूपमेवेयं शकुन्तला पतिगृहगमनायानुमता। यत एभिः अस्याः समानस्वरं मधुरं कोकिलाङ्गनाना मञ्जुकूजितं प्रत्युत्तरवदुपन्यस्तं तस्मात्

[1]अभि. शा 01/14
[2]अभि. शा 01/ पृ28
[3]अभि. शा 02/ 05
[4]अभि. शा 02/ पृ115
[5]अभि. शा 04/ पृ185

एभिस्तरुभिरपीयं शकुन्तला गन्तुमनुमन्यते एव । यात्राकाले हि कोकिलध्वनिं शकुनज्ञैः शुभं मन्यन्ते ।

**अनुमतगमना शकुन्तला तरुभिरियं वनवासबन्धुभिः ।**
**परभृतविरुतं कलं यथा प्रतिवचनीकृतमेभिरीदृशम् ॥**[6]

पुत्र्याः भर्तृगृहप्रस्थानकाले का दशा भवति ? महाकविः कस्य हृदि कारुण्यं न जनयति । आश्रमवासिनः ब्रह्मचारिणः तादृशं दुःखं सोढुं न शक्नुवन्ति -

**यास्यत्यद्य शकुन्तलेति हृदयं संस्पृष्टमुत्कण्ठया**
**कण्ठः स्तम्भितबाष्पवृत्तिकलुषश्चिन्ताजडं दर्शनम् ।**
**वैक्लव्यं मम तावदीदृशमिदं स्नेहादरण्यौकसः**
**पीड्यन्ते गृहिणः कथं नु तनयाविश्लेषदुःखैर्नवैः ॥६ ॥**[7]

पिता कण्वः पुत्रीं शकुन्तलामुपदिशति कथं स्वस्मिन् गृहे वर्तनं करणीयम् ? अत्यतं मनोवैज्ञानिकं तादृशं चिन्तनं विहितं येन अद्यापि स्त्रियः परिपालनं कृत्वा सौख्यं समाजोपयोगि जीवनं वा जीवितुं शक्नुवन्ति –

**शुश्रूषस्व गुरून्कुरु प्रियसखीवृत्तिं सपत्नीजने**
**भर्तुर्विप्रकृताऽपि रोषणतया मा स्म प्रतीपं गमः ।**
**भूयिष्ठं भव दक्षिणा परिजने भाग्येष्वनुत्सेकिनी**
**यान्त्येवं गृहिणीपदं युवतयो वामाः कुलस्याधयः ॥१८ ॥**

अवगुण्ठनं भारतीयपम्परायाः वैशिष्ट्यं वर्तते । यवनिका (पर्दा प्रथा) अवगुण्ठनम् इत्यनयोः महदन्तरं वर्तते अवगुण्ठने शाटिकायाः शिरसि आच्छादनमेव भवति किन्तु मुखदर्शनादिकं भवति । दुष्यन्तस्य गृहे प्राप्यमाणा शकुन्तलायाः वर्णनं विद्यते पाण्डुपत्राणां मध्ये किसवलयमिव तपोधनानां मध्ये नातिपरिस्फुटशरीरलावण्या अवगुण्ठनवती का ?

**का स्विदवगुण्ठनवती नातिपरिस्फुटशरीरलावण्या ।**
**मध्ये तपोधनानां किसलयमिवं पाण्डुपात्राणाम् ॥१३ ॥**[8]

एवं प्रकारेण लोकसंस्कृतेः सन्दर्शनं भवति । **शास्त्रसंस्कृतेः** छटां द्रष्टुं शक्नुमः तद्यथा पुराणेषु भगवतः शिवस्य लोकोपयोगि स्वरूपं वर्णितम् ***भूतार्कचन्द्रयज्वानो मूर्तयोष्टौ प्रकीर्तिताः*** ।

**अष्टानां लोकपालानां मात्राभिर्जायते नृपः ।।**

**भूमिरापोनिलो वायुरात्मा व्योमरविशशी ।**

[6] अभि. शा 04/ 09
[7] अभि. शा 04/ 06
[8] अभि. शा 05/ 13

**इत्यष्टौ सर्वलोकानां प्रत्यक्षाः परमूर्तयः।।** किन्तु एतयोः श्लोकयोः सुस्पष्टता न भवति । मपाकविः शिवस्य अष्ट विग्रहान् 1. जलमयीं 2. अग्निमयीं 3. यजमानरूपां 4. सूर्यरूपां 5. चन्द्ररूपां 6.आकाशमयीं 7. पृथिवीरूपां 8.वायुरूपाञ्च मूर्तयः सन्ति । एतासां युक्तिपुरस्सरं चित्रणं महाकविना विधत्तम् –

**या सृष्टिः स्रष्टुराद्या वहति विधिहुतं या हविर्या च होत्री**
**ये द्वे कालं विधत्तः श्रुतिविषयगुणा या स्थिता व्याप्य विश्वम्।**
**यामाहुः सर्वबीजप्रकृतिरिति यया प्राणिनः प्राणवन्तः**
**प्रत्यक्षाभिः प्रपन्नस्तनुभिरवतु वस्ताभिरष्टाभिरीशः॥ १ ॥**[9]

यदा विदूषकः नीवारषष्ठभागमस्मानुपगृह्णन्तु इति परामृशति तदा राजा कथयति भोः एते ऋषयः पुण्यस्य भागं ददति तदक्षय्यमेव। तद्यथा-

**यदुत्तिष्ठति वर्णेभ्यो नृपाणां क्षयि तत्फलम्।**
**तपः षडभागमक्षय्यं ददत्यारण्यका हि नः॥**[10]

कर्मकाण्डे त्रयः अग्नयो भवन्ति गार्हपत्यः आहवनीयःदाक्षिणात्यश्च तथैव उक्तनामधारीणि कुण्डानि भवन्ति। एवम्भूता अग्नयः रक्षन्तु इति आशीः यच्छति महर्षि कण्वः –

**अमी वेदिं परितः क्लृप्तधिष्ण्याः समिद्वन्तः प्रान्तसंस्तीर्णदर्भाः**
**अपघ्नन्तो दुरितं हव्यगन्धैर्वैतानास्त्वां वह्नयः पावयन्तु ॥८**[11]

शार्ङ्गवः नीतिं स्मारयति स्नेहिजनान् कियत्पर्यन्तं प्रेयषयेत् – भगवन् ओदकान्तं स्निग्धो जनोनुगन्तव्यः। वस्तुतः अत्र शास्त्रमर्यादा विद्यते यस्य दर्शनं नीतौ वर्तते । शाकुन्तलस्य रहस्यवचनमिदमेव यस्याभावेन शकुन्तला कष्टं प्रभूतं प्राप्तवती –

**अतः परीक्ष्य कर्तव्यं विशेषात्सङ्गतं रहः।**
**अज्ञातहृदयेष्वेवं वैरीभवति सौहृदम् ॥२४॥**[12]

कालिदासस्य दृष्टिः विविधोपायेन समाजं शिक्षयति । संस्कृतिः संस्कारं प्रदाय जनान् प्रकाशे आनयति नो चेत् पशुषु मानवेषु अन्तरं नपि भवेत्। शास्त्रान्विता संस्कृतिः सामाजिकमनोरथान् पूरयति । मङ्गलमपि तेनैव भवति – महाकवेः मङ्गलं संस्कृतेः सम्यग् दर्शनं कारयति – प्रकृतिहिताय भूपतिः भवेत्, सरस्वती श्रुतिं समेधयेत, अहंतत्त्वसम्बन्धिनं माम् शान्तिं तनोतु

**प्रवर्ततां प्रकृतिहिताय पार्थिवः**
**सरस्वती श्रुतमहती महीयताम्**

---

[9] अभि. शा 01/ 1
[10] अभि. शा 02/ 13
[11] अभि. शा 04/ 7
[12] अभि. शा 05/ 24

**ममापि च क्षपयतु नीललोहितः**
**पुनर्भवं परिगतशक्तिरात्मभूः ॥**[13]

**निष्कर्षः –** संस्कृतिसंस्कारयोर्मध्ये किञ्चिदन्तरम्। यद्यपि व्याकरणशास्त्रदृष्ट्या समुपसर्गे कृधातौ भावे घञि कृते सति संस्कारशब्दः क्तिन्प्रत्यये सति संस्कृतिशब्दः निष्पद्यते। किन्तु व्यवहारे एतयोःविशिष्टार्थःविद्यते। समाजं रक्षति संस्कृतिः आत्मानं संस्कारःत्रायते। अभिज्ञानशाकुन्तले महाकविकालिदासः संस्कृति – संस्कार-शिक्षादिविषयेषु अवगाहनं कृत्वा धर्मस्य परिपालनं करोति। सर्वभूतहिते रताः इति तत्त्वं हृदि निधाय प्रजा –राज -समाज-संस्कृतीनां सूक्ष्मरित्या वर्णनं प्रस्तौति कविः। स्त्रीणां विषये कवेः विशिष्टलेखनं सर्वदा महत्त्वपूर्णं वर्तते। अतः एतदेव वचनं युक्तम् - **अतः परीक्ष्य कर्तव्यं विशेषात्सङ्गतं रहः।** प्रकृतेरुपासना करणीया इति मङ्गलाचरणे अष्टमूर्तेः स्मरणेनैव ज्ञायते। काव्येषु अस्माकं भारतीया संस्कृतिः तिष्ठतीति नह्यत्र संशीतिलेशः।

- **<u>सन्दर्भग्रन्थाः -</u>**


1. अभिज्ञानशाकुन्तलम्, चौखम्भा सुरभारती प्रकाशन, वाराणसी (उ.प्र.)
2. अमरकोशः, चौखम्भा सुरभारती प्रकाशन, वाराणसी (उ.प्र.)
3. पाणिनि- अष्टाधायायीसूत्रपाठ, चौखम्भा सुरभारती प्रकाशन, वाराणसी (उ.प्र.)
4. वैयाकरणसिद्धान्तकौमुदी, सम्पादक - गोपालदत्तपाण्डेय , चौखम्भा सुरभारती प्रकाशन, वाराणसी (उ.प्र.)
5. महाभाष्यम्, वाणी विलास प्रकाशन, वाराणसी (उ.प्र.)
6. संस्कृत साहित्य का इतिहास , पं. बलदेव उपाध्याय, सम्पूर्णानन्द संस्कृत विश्वविद्यालय, वाराणसी (उ.प्र.)
7. वाक्यपदीयम् , चौखम्भा सुरभारती प्रकाशन, वाराणसी (उ.प्र.)


*सहायकाचार्यः, व्याकरणविभागाध्यक्षः, महर्षिपाणिनिसंस्कृतवैदिकविश्वविद्यालयः, उज्जयिनी

[13]अभि. शा 07/ 35